CS (Main) Exam, 2019

**वियोज्यम् DETACHABLE**

# संस्कृतम् (द्वितीयं प्रश्नपत्रम्)
# (साहित्यम्)

# SANSKRIT (Paper II)
# (LITERATURE)

*समयः : होरात्रयम् (घंटा-त्रयम्)*
*Time Allowed : Three Hours*

*पूर्णांकाः : 250*
*Maximum Marks : 250*

प्रश्नपत्र-संबन्धिताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः ।**

**खण्डद्वये** विभाजिताः **अष्टौ प्रश्नाः** ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

**प्रथम-पञ्चमौ** प्रश्नौ अपरिहार्यौ । अवशिष्टेषु प्रश्नेषु **त्रयः प्रश्नाः** समाधेयाः । प्रतिखण्डम् **एकः प्रश्नः** अवश्यं ग्रहणीयः ।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः ।

**चतुर्थ-पञ्चम-षष्ठप्रश्नाः** संस्कृतभाषायां देवनागरीलिप्या समाधेयाः । अवशिष्टप्रश्नानामुत्तरं **संस्कृतभाषायां** देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम् ।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया ।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम् ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत् ।

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Questions No. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** from each Section.

The number of marks carried by a question/part is indicated against it.

Questions No. **4**, **5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## खण्डः 'A' SECTION 'A'

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (150) शब्दैः विधीयताम् । 10×5=50

1.(a) 'कुमारसम्भवं कालिदासस्य कलायाः सुन्दरसृष्टिरस्ति'— इति सोदाहरणं प्रतिपादयत । 10

1.(b) शिशुपालवध-महाकाव्यमवलम्ब्य 'माघे सन्ति त्रयो गुणाः'— इति मतस्य याथार्थ्यं सयुक्तिकं सोदाहरणं च प्रतिपाद्यताम् । 10

1.(c) 'नैषधं विद्वदौषधम्'— मतमिदं सयुक्तिकं सोदाहरणं च समीक्ष्यताम् । 10

1.(d) दशकुमारचरितं तत्कालगामिनः समाजस्य जीवितमुद्बुद्धं प्रज्वलच्चित्रं प्रस्तवीति — समीक्ष्यताम् । 10

1.(e) ऐतिहासिककाव्यदृष्ट्या शिवराज्योदयकाव्यस्य महत्त्वं विवृणुत । 10

2. अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत — 15+15+20=50

2.(a) ईशोपनिषदि प्राप्तो ज्ञानकर्मसमन्वयो निरूप्यताम् । 15

2.(b) 'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः' अस्याशयः स्पष्टीकरणीयः । 15

2.(c) वाल्मीकिरामायणे सुन्दरकाण्डस्य वैशिष्ट्यानि प्रतिपादयत । 20

3. अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया । 15+15+20=50

3.(a) 'शाकुन्तलचतुर्थोऽङ्कः सर्वोत्कृष्टइति प्रथा ।
न सर्वसंमता यस्मात् पञ्चमोऽस्ति ततोऽधिकः ।।'— सोदाहरणं समीक्ष्यताम् । 15

3.(b) 'मुद्राराक्षसे चरित्राणां चित्रणं ललितं नितान्तम्'— इत्यस्य वचनस्य याथार्थ्यं प्रतिपादयत । 15

3.(c) 'उत्तरे रामचरिते भवभूतिर्विशिष्यते'— इति समीक्ष्यताम् । 20

4. अधस्तनानां विवेचनं संक्षेपेण **संस्कृतभाषयैव** देवनागरीलिप्यामेव च कर्तव्यम् । 15+15+20=50

4.(a) 'मेघदूते वर्णिता बाह्यप्रकृतिः विरहप्रपीडितस्योत्कण्ठितहृदयस्य मार्मिकव्यथास्ति'— इति सोदाहरणं समीक्षताम् । 15

4.(b) 'जयदेवप्रणीते गीतगोविन्दे मधुरकोमलकान्तपदावल्या भक्तिरेवसाधिता'— इति विशदं समालोचयत । 15

4.(c) बाणप्रणीतस्य हर्षचरितस्य ऐतिहासिकं महत्त्वं लिखत । 20

## खण्डः 'B' SECTION 'B'

5. नागराक्षरैः **संस्कृतभाषायां** प्रत्येकं सार्धशतेन (150) शब्दैः व्याख्यायन्ताम् — 10×5=50

5. (a) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ 10

5. (b) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ 10

5. (c) अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपिजातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ 10

5. (d) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो नहि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ 10

5. (e) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥ 10

6. अधानिर्दिष्टानां व्याख्या नागराक्षरैः **संस्कृतभाषायामेव** विधेया — 15+20+15=50

6. (a) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ 15

6. (b) न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ 20

6. (c) सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ।
तां विलोक्य विशालाक्षीमधिकं मलिनां कृशाम् ॥ 15

7. अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः । 15+15+20=50

7. (a) मन्द मन्द नुदात पवनश्चानुकूला यथा त्वा
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ 15

7.(b) स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ 15

7.(c) यैवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः । अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः । 20

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या । 15+15+20=50

8.(a) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ॥ 15

8.(b) उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ 15

8.(c) विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥ 20

---